SUNDAY PUJA

ISHWAR ASHRAM TRUST

ISHBER (KASHMIR)
MOHINDER NAGAR (JAMMU)
SARITA VIHAR (NEW DELHI)

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

Sunday Pooja

Published by:

Ishwar Ashram Trust

May 9, 2002.

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

विषयानुक्रमणिका

सं	विषय	पृष्ठ	
१.	आलम्बे ० सर्वज्ञा ०	१	(1)
२.	श्रीरामेश्वरआचार्यकृता श्रीगुरुस्तुतिः	२	(2)
३.	कौलेत्युपाह्वश्रीजियालालरचिता श्रीपादुकास्तुतिः	१३	(13)
४.	श्रीमन्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्त-पादविरचितं देहस्थदेवताचक्रस्तोत्रम्	१८	(18)
५.	श्रीश्रीज्ञाननेत्रपादरचितं कालिकास्तोत्रम्	२२	(22)
६.	ओमिति स्फुरदुरस्य०	२७	(27)
७.	श्रीक्रमस्तोत्र	३५	(35)
८.	यो विचित्र०	४२	(42)
९.	अस्त्यस्मिन्महसा०	४३	(43)
१०.	श्रीबहुरूपगर्भस्तोत्रः	४६	(46)
११.	श्रीगुरुगीता	७३	(73)
१२.	ॐग्लौं गं गणपतये०	९२	(92)
१३.	लिङ्गेऽत्र०	१०२	(102)
१४.	सोऽहं सोऽहं ०	१०४	(104)
१५.	ॐ अमृतेश्वरभैरवं ०	१०७	(107)
१६.	सद्गुरुलक्ष्मणदेवस्य अष्टोत्तर शत नामावली	११२	(112)
१७.	व्याप्तचराचर०	१२९	(129)
१८.	जयगुरुदेव हरे ०	१३३	(133)

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ

श्रीगुरवे नमः ॥

आलम्बे जगदालम्बं हेरम्ब चरणाम्बुजम् ।
शुष्यन्ति यद्रजस्पर्शात् सद्यः प्रत्यूहवारधयः ।।३।।

सर्वज्ञाः सर्वकर्तारो
ब्रह्माद्या भुवनेश्वराः ।
यत्रैते बुद्बुधायन्ते
बोधाब्धिं तं स्तुमः शिवम् ।।३।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीरामेश्वराचार्यकृता श्रीगुरुस्तुति ।

::::::

गुरुशक्तिर्जयत्येका मद्रूपप्रविकासिका ।
स्वरूपगोपनव्यग्रा शिवशक्तिर्जिता यया ।।

यस्य प्रसादादहमेव शम्भु-
र्यस्य प्रसादादहमीश्वरोऽस्मि ।
यस्य प्रसादादहमेव सर्व-
स्तस्मै नमः श्रीगुरवे शिवाय ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

शैवप्रजाः स्रष्टुमना महेशो
गुरुक्रमेऽभून्मनुदेवरूपः ।
स्तुमो गुरुं तं परमेष्ठिरूपं
साक्षाच्छिवं श्रीमनुदेवमेव ।।

विकल्पशान्त्यर्थमिव प्रवृत्ता-
च्छास्त्रात्सदादूरतमस्वभावे ।
संवित्स्वभावे परिवर्तमानो
दृष्ट्यैव शिष्यानकरोत्स शंभून् ।।

तत्सिद्धपादप्रभवत्प्रकाशो
माहेश्वरोऽवाप्तशिवात्मभावः ।
श्रीमानभूद्राम इति प्रसिद्धो
यो मद्गुरोः कल्मषरावणारिः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ज्येष्ठोऽप्यसौ मद्गुरुजन्मजात-
हर्षोल्लसद्विस्मृतदेहभावः ।
रामोऽस्म्यहं लक्ष्मण एष जात
इत्येव गायन् सहसा ननर्त ।।

शिष्यान् समुद्बोधयितुँ स नित्यं
सदातनं स्वस्य शिवस्वभावम् ।
प्रादर्शयद्देहगतं समक्षं
होराश्चतस्रोऽधिगतः समाधिम् ।।

कृत्यं विधेयस्य जनस्य शेषं
सप्ताब्दकल्पस्य च लक्ष्मणस्य ।
शिष्यप्रधानं महताबकाकं
निर्दिश्य सोऽगान्निजधाम शैत्नम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

न लक्षणं यस्य न योऽस्ति लक्ष्यः
षडध्वनो योऽस्ति च लक्ष्मभूतः ।
यो लक्ष्मणस्येव च लक्ष्मणस्य
रामो गुरू राम इव स्तुमस्तम् ।।

ऊर्जस्य शुक्ले च तिथौ चतुर्थ्यां
जगज्जिगीषून् स्वत ऊर्जयन्तः ।
आविर्बभूवुर्महताबकाकाः
काश्मीरकण्डाभिधजन्मभूमौ ।।

तानद्य सर्वे वयमाविशन्तो
गुरून् स्मरन्तो मनसाथ वाचा ।
विशुद्धभक्त्या प्रणता नमामः
स्थितांश्च ज्ञानप्रभयागतानपि ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

तज्ज्ञानगोत्रे गुरवश्चकासति
ज्ञानप्रभाभिः प्रसृताभिरद्य ।
श्रीलक्ष्मणाख्याः प्रणतां जनानां
दृष्ट्यैव दृष्टेः तमसां विघातकाः ।।

बिभर्त्ति स्वस्मिन् स्वविमर्शशक्त्या
सर्गस्थितिध्वंसमनारतं यः ।
तमच्छमच्छन्नमनन्तरूपं
श्रीलक्ष्मणाख्यं प्रणमामि वन्द्यम् ।।

प्रकाशरूपस्य चिदात्मनस्ते
स्वातन्त्र्यमेतन्नहि किंचिदन्यत् ।
शिवादिपृथ्व्यन्तसमस्तविश्व-
रूपेण चैकोऽपि विभासि यत्त्वम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

त्वय्येव भातः स्मृतिविस्मृती ते
द्वयोरपि त्वं स्वयमेव भासि ।
तथापि सांमुख्यसुखाभिवर्षिणी
स्मृतिः प्रिया ते नहि विस्मृतिर्मे ।।

वाचा कया त्वामहमीशमीडे
प्रसादये त्वां क्रियया कया वा ।
यतः सदान्तर्मुखभास्वरूपो
न मायिकं पश्यसि किंचिदेतत् ।।

वाचा निर्मलया सुधामधुरया दृष्ट्या च शिष्यान्निजा-
नुद्धर्त्तुं नरविग्रहीव रमते यः स्वात्मसंस्थः शिवः ।
तं वन्दे परमप्रकाशनिबिडं स्वेच्छास्फुरद्विग्रहं
कारुण्याम्बुनिधिं महागुरुवरं श्रीलक्ष्मणं सर्वदम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

शश्वच्छातिसमावृतोऽपि विषयैरेभिर्निजोद्भासितै-
र्हासोल्लासविलासकौतुकपरः स्वस्मिन्समन्तात्स्थितः ।
यश्चैतन्यसुधानिधिर्विजयते देवः स एको गुरु-
र्विद्वन्मानसपुष्करप्रविततज्ञानप्रभो लक्ष्मणः ।।

पूज्यः श्रीगुरुराजलक्ष्मणशिवः काश्मीरदेशस्थितो
भातु ध्वान्तनिवारको भुवि नृणां चित्ते स शान्तिप्रदः ।
आसीदस्ति भवत्यपि प्रतिदिनं यो लीलया सन्ततं
स्वच्छः स्वाद्भुतशक्तिचक्रविभवस्त्रैलोक्यमेतज्जगत् ।।

वाणी यस्य सुनिर्मलातिसरसा तापत्रयोज्झासने
यद्दृष्टिं करुणाभरां नतजनोद्धारे परिस्पर्धते ।
यत्रैकापि नतिर्ददाति सकलं साम्राज्यमत्यद्भुतं
तत्रैवास्तु महेश्वरे मम गुरौ श्रीलक्ष्मणे मे रतिः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीगुरुपदनखजन्मा
जन्मान्धस्यापि प्रकाशयन्नर्थान् ।
स जयति कोऽपि विकासः
प्रकाशमानोऽनवच्छिन्नः ।।

विनाशिताशेषविकल्पबुद्ध्य-
हंरूपमन्त्रार्थविकासिकाभ्याम् ।
देहाद्यहंकारनिवर्तिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

उद्घाटिताद्वैतमहेक्षणाभ्यां
निमीलितद्वैतविलोचनाभ्याम् ।
मोहान्धकारेऽपि विरोचनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

उदीर्णरागप्रतिरोधिकाभ्यां
विलीनबोधप्रतिबोधिकाभ्याम् ।
अनादिमायामलवारिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

अम्बादिरौद्र्यन्तमरीचिकाभ्यां
वर्णादिसर्वाध्वविवर्त्तिकाभ्याम् ।
इच्छादिदेवीततचन्द्रिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

संसारदावानलघोरताप-
शान्त्यर्थपीयूषमहाह्रदाभ्याम् ।
आप्यायितस्मर्तृजनव्रजाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

समस्तविद्योदधिसारदाभ्यां
श्रीशारिकास्वान्तसुसेविताभ्याम् ।
सच्छिष्यवृन्दैः परिपूजिताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

प्रभाप्रकाशार्थधृतव्रताभ्यां
तिरस्कृतानादिमनस्तमोभ्याम् ।
मुक्तिप्रदाभ्यां विभवप्रदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

दौर्भाग्यदावाग्निशिवाम्बुदाभ्यां
दूरीकृताशेषविपत्ततिभ्याम् ।
कृपाकृतार्थीकृतमादृशाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

इमानि पद्यपुष्पाणि सदाह्लादकराण्यतः ।
लभन्तां स्वीयसाफल्यं गुरुपूजामहोत्सवे ।।

गुरुस्तुतिफलं वक्तुं शक्तः शेषोऽपि नो परम् ।
स्वदन्ते स्तुतिकर्तारः फलं सद्यः परामृतम् ।।

रामेश्वरेण विदुषा भक्तिप्रेरितचेतसा ।
श्रीगुरोर्लक्ष्मणस्यैषा रचिता पादुकास्तुतिः ।।

.....

इति मिथिलादेशस्थश्रीरामेश्वराचार्यस्य कृतिरियम्।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ

कौलेत्युपाह्वश्रीजियालालरचिता श्रीपादुकास्तुतिः ।।

गौरीपतिं जगन्नाथं सर्वसंकटनाशिनम् ।
स्वभक्त्यामृतदातारं मुनीनां हितकारिणम् ।।
समावेशरसास्वादपरमाह्लादचेतसाम् ।
योगिनां हृदये नित्यं भासमानं चिदात्मकम् ।।
गुरूणामपि सर्वेषां गुरुं चैकं जगद्गुरुम् ।
नमाम्यहं महादेवं विश्वकल्याणकारिणम् ।।

(तिलकम्)

जयन्ति गुरुदेवानां पादपंकजपांसवः ।
यत्संस्पर्शात्तरन्त्येते जनाः संसारसागरम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यज्जन्मपूतां जगतीं विलोक्य
स्वसृष्टिसाफल्यमबोधि धाता ।
नमाम्यहं तं गुरुमीश्वराख्यं
शिष्यान्समस्ताञ्छिवयन्तमेकम् ।।

आशैशवाद्यो लभते समाधिं
योगीन्द्रनाथः स महाप्रभावः ।
एतद्धि श्रुत्वा चकिता जनाः स्यु-
र्हृष्टाः पुनस्ते विदितप्रभावाः ।।

समाधिलग्नं विषयैर्विमुक्तं
मनोऽस्य भोगेषु नियोजयन्तौ ।।
कृतप्रयत्नावनवाप्तकामौ
शिष्यत्वमेवाधिगतौ गुरू स्वौ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यथा पुरा तत्पितरौ न शेकतुः
सुतस्य बुद्धस्य मनो विचालितुम्।
महात्मनो धैर्यधनस्य योगिनो
विरागिणस्तत्त्वगवेषणोद्यतम् ।।

(युगलकम्)

यस्य प्रसादान्न भयं न दुःखं
सद्यो भवत्येव सुखञ्च शांतिः ।
नश्यन्ति विघ्नाः परमार्थमार्गे
तं रक्षितारं गुरुमानतोऽस्मि ।।

गुरुप्रसादाञ्च सुखी सदाहं
गुरुप्रसादाञ्च सदा शिवोऽहम् ।
तस्मात्सदा तस्य दयाभिकाङ्क्षी
तत्पादपद्मं हि सदाश्रयेऽहम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

नमाम्यहं श्रीगुरुपादुकाद्वयं
वदाम्यहं श्रीगुरुदेवनाम ।
करोम्यहं श्रीगुरुपादपूजनं
भजाम्यहं तं सततं शरण्यम् ।।

भवन्तु सर्वे गुरुदेवशिष्या
धर्मप्रियाः पापपराङ्मुखाश्च ।
दया सदास्मासु चकास्ति यस्य
नमाम्यहं तं गुरुवर्यमीशम् ।।

जयति श्रीगुरोरेष प्रादुर्भावदिनोत्सवः ।
समागता जना यस्मिन् भवन्ति विमलाशयाः ।।

इति शिवम् ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

FIRST SUNDAY.. ..देहस्थदेवताचक्र

SECOND SUNDAY ..कालिकस्तोत्र

THIRD SUNDAY ..ओमिति०

FOURTH SUNDAY ..श्रीक्रमस्तोत्र

It will rotate accordingly

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ

अथ

श्रीमन्महामाहेश्वराचार्यवर्य-
श्रीमदभिनवगुप्तपादविरचितं
देहस्थदेवताचक्रस्तोत्रम् ।

असुरसुरवृन्दवन्दितमभिमतवरवितरणे निरतम् ।
दर्शनशताग्र्यपूज्यं प्राणतनुं गणपतिं वन्दे ।।

वरवीरयोगिनीगणसिद्धावलिपूजितांघ्रियुगलम् ।
अपहृतविनयिजनार्तिं वटुकमपानाभिधं वन्दे ।।

आत्मीयविषयभोगैरिन्द्रियदेव्यः सदा हृदम्भोजे ।
अभिपूजयन्ति यं तं चिन्मयमानन्दभैरवं वन्दे ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यद्बीबलेन विश्वं भक्तानां शिवपथं भाति ।
तमहमवधानरूपं सद्गुरुममलं सदा वन्दे ।।

उदयावभासचर्वणलीलां विश्वस्य या करोत्यनिशम् ।
आनन्दभैरवीं तां विमर्शरूपामहं वन्दे ।।

अर्चयति भैरवं या निश्चयकुसुमैः सुरेशपत्रस्था ।
प्रणमामि बुद्धिरूपां ब्रह्माणीं तामहं सततम् ।।

कुरुते भैरवपूजामनलदलस्थाभिमानकुसुमैर्या ।
नित्यमहंकृतिरूपां वन्दे तां शाम्भवीमम्बाम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

विदधाति भैरवार्चां दक्षिणदलगा विकल्पकुसुमैर्या ।
नित्यं मनःस्वरूपां कौमारीं तामहं वन्दे ।।

नैऋतदलगा भैरवमर्चयते शब्दकुसुमैर्या ।
प्रणमामि श्रुतिरूपां नित्यं तां वैष्णवीं शक्तिम् ।।

पश्चिमदिग्दलसंस्था हृदयहरैः स्पर्शकुसुमैर्या ।
तोषयति भैरवं तां त्वग्रूपधरां नमामि वाराहीम् ।।

वरतररूपविशेषै र्मारुतदिग्दलनिषण्णदेहा या ।
पूजयति भैरवं तामिन्द्राणीं दृक्तनुं वन्दे ।।

धनपतिकिसलयनिलया या नित्यं विविधषड्रसाहारैः ।
पूजयति भैरवं तां जिह्वाभिख्यां नमामि चामुण्डाम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ईशदलस्था भैरवमर्चयते परिमलैर्विचित्रैर्या ।
प्रणमामि सर्वदा तां घ्राणाभिख्यां महालक्ष्मीम् ।।

षड्दर्शनेषु पूज्यं षट्त्रिंशत्तत्त्वसंवलितम् ।
आत्माभिख्यं सततं क्षेत्रपतिं सिद्धिदं वन्दे ।।

संस्फुरदनुभवसारं
सर्वान्तः सततसन्निहितम् ।
नौमि सदोदितमित्थं
निजदेहगदेवताचक्रम् ।।

इति श्रीमदाचार्याभिनवगुप्तपादविरचितं देहस्थदेवताचक्रस्तोत्रम् ।

इति शिवम् ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ

अथ

श्रीश्रीज्ञाननेत्रपादरचितं

कालिकास्तोत्रम् ।

सिततरसंविदवाप्यं सदसत्कलनाविहीनमनुपाधि ।
जयति जगत्-त्रयरूपं नीरूपं देवी ! ते रूपम् ।।

एकमनेकाकारं प्रसृतजगद्व्याप्ति विकृतिपरिहीनम् ।
जयति तवाद्वयरूपं विमलमलं चित्स्वरूपाख्यम् ।।

जयति तवोच्छलदन्तः स्वच्छेच्छायाः स्वविग्रहग्रहणम् ।
किमपि निरुत्तरसहजस्वरूपसंवित्प्रकाशमयम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

वान्त्वा समस्तकालं भूत्या झंकारघोरमूर्त्तिमपि ।
निग्रहमस्मिन्कृत्वानुग्रहमपि कुर्वति जयसि ।।

कालस्य कालि ! देहं विभज्य मुनिपञ्चसंख्यया भिन्नम् ।
स्वस्मिन्विराजमानं तद्रूपं कुर्वती जयसि ।।

भैरवरूपी कालः सृजति जगत् कारणादिकीटान्तम् ।
इच्छावशेन यस्याः सा त्वं भुवनाम्बिका जयसि ।।

जयति शशाङ्कदिवाकरपावकधामत्रयान्तरव्यापि ।
जननि ! तव किमपि विमलं स्वरूपरूपं परं धाम ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

एकं स्वरूपरूपं प्रसरस्थितिविलयभेदतस्त्रिविधम् ।
प्रत्येकमुदयसंस्थितिलयविश्रमतश्चतुर्विधं तदपि ।।
इति वसुपञ्चकसंख्यं विधाय सहजस्वरूपमात्मीयम् ।
विश्वविवर्त्तावर्त्तप्रवर्तकं जयति ते रूपम् ।।

(युगलकम्)

सदसद्विभेदसूतेर्दलनपरा कापि सहजसंवित्तिः ।
उदिता त्वमेव भगवति ! जयसि जयाद्येन रूपेण ।।

जयति समस्तचराचरविचित्रविश्वप्रपञ्चरचनोर्मि ।
अमलस्वभावजलधौ शान्तं कान्तं च ते रूपम् ।।

सहजोल्लासविकासप्रपूरिताशेषविश्वविभवैषा ।
पूर्णा तवाम्ब ! मूर्तिर्जयति परानन्दसंपूर्णा ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

कवलितसकलजगत्-त्रयविकटमहाकालकवलनोद्युक्ता ।
उपभुक्तभावविभवप्रभवापि कृशोदरी जयसि ।।

रूपत्रयपरिवर्जितमसमं रूपत्रयान्तरव्यापि ।
अनुभवरूपमरूपं जयति परं किमपि ते रूपम् ।।

अव्ययमकुलममेयं विगलितसदसद्विवेककल्लोलम् ।
जयति प्रकाशविभवस्फीतं काल्याः परं धाम ।।

ऋतुमुनिसंख्यं रूपं विभज्य पंचप्रकारमेकैकम् ।
दिव्यौघमुद्गिरन्ती जयति जगत्तारिणी जननी ।।

भूदिग्गोखगदेवीचक्रलसज्ज्ञनविभवपरिपूर्णम् ।
निरुपमविश्रांतिमयं श्रीपीठं जयति ते रूपम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

प्रलयलयान्तरभूमौ विलसितसदसत्प्रपंचपरिहीनाम् ।
देवि! निरुत्तरतरां नौमि सदा सर्वतः प्रकटाम् ।।

यादृङ् महाश्मशाने दृष्टं देव्याः स्वरूपमकुलस्थम् ।
तादृग् जगत्-त्रयमिदं भवतु तवाम्ब ! प्रसादेन ।।

इत्थं स्वरूपस्तुतिरभ्यधायि
सम्यक्समावेशदशावशेन ।
मया शिवेनास्तु शिवाय सम्यङ्
ममैव विश्वस्य तु मङ्गलाय ।।

(कृतिरियं श्रीश्रीज्ञाननेत्रपादानामिति शिवम्) ।।

अस्मद्रूप समाविष्टः स्वात्मनात्म निवारणे ।
शिवः करोतु निजया नमः शक्त्याततात्मने ।।२।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ नमःशिवाय ।।

....

ओमिति स्फुरदुरस्यनाहतं
गर्भगुम्फितसमस्तवाङ्मयम् ।
दन्ध्वनीति हृदि यत्परं पदं
तत्सदक्षरमुपास्महे महः ।। १ ।।

भानुना तुहिनभानुना बृहद्-
भानुना च विनिवर्तितं न यत् ।
येन तज्झगिति शान्तिमान्तरं
ध्वान्तमेति तदुपास्महे महः।। २

तर्ककर्कशगिरामगोचरं
स्वानुभूतिसमयैकसाक्षिणम् ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

मीलिताखिलविकल्पविप्लवं
पारमेश्वरमुपास्महे महः ।। ३ ।।

पद्मसद्मकरमर्दलालितं
पद्मनाभनयनाब्जपूजितम् ।
पद्मबन्धुमुकुटांशुरञ्जितं
पादपद्मयुगमैश्वरं स्तुमः ।। ४ ।।

यदि हरोऽसि तदा हर दुष्कृतं
यदि भवोऽसि तदा भव भूतये ।
यदि शिवोऽसि तदा कुरु मे शुभं
शमय दुःखमिदं यदि शङ्करः ।। ५ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

शरणं तरुणेन्दुशेखरः
शरणं मे गिरिराजकन्यका ।
शरणं पुनरेव तावुभौ
शरणं नान्यदुपैमि दैवतम् ।। ६ ।।

सदुपायकथास्वपण्डितो
हृदये दुःखशरेण खण्डितः ।
शशिखण्डशिखण्डमण्डनं
शरणं यामि शरण्यमीश्वरम् ।। ७

रामनामजपतां कुतो भयं
सर्वतापशमनैकभेषजम् ।
पश्य तात मम गात्रसन्निधौ
पावकोऽपि सलिलायतेऽधुना ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

क्षालयामि तव पादपङ्कजं
ताथ दारुदृषदोः किमन्तरम् ।
मानुषीकरणचूर्णमस्ति ते
पादयोरिति कथा प्रथीयसी ।। ९ ।।

आञ्जनेयमतिपाटलाननं
काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं
भावयामि पवमाननन्दनम् ।। १० ।।

यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
वाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम् ।। ११

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ।। १२ ।।
मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ।। १३ ।।

(युगलकम्)

स्वैरेव यद्यपि गतोऽहमधः कुकृत्यै-
स्तत्रापि नाथ तव नास्म्यवलेपपात्रम् ।
दृप्तः पशुः पतति यः स्वयमन्धकूपे
नोपेक्षते तमपि कारुणिको हि लोकः ।। १४

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

मानुष्यनावमधिगम्य चिरादवाप्य
निस्तारकञ्च करुणाभरणं भवन्तम् ।
यस्याभवद्भरवशस्तरितुं भवाब्धिं
सोऽहं ब्रुडामि यदि कस्य विडम्बनेयम् ।। १५ ।।

महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न कापि भेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ।। १६ ।।

वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ।। १७ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीरामः शरणं समस्त जगतां रामं नमामीश्वरम् ।
रामेण रचितं त्रिलोकमखिलं रामाय तुभ्यं नमः ।। १८ ।।
रामात् सर्वमिदम् जगत् समुदितं रामस्य दासोऽस्म्यहम् ।
रामे मे रतिरस्तु राम ! नहिमाम् मोक्तुं भवानर्हति ।। १९ ।।

(युगलकम्)

तव च काचन न स्तुतिरम्बिके
सकलशब्दमयी किल ते तनुः ।
निखिलमूर्तिषु मे भवदन्वयो
मनसिजासु बहिष्प्रसरासु च ।। २० ।।
इति विचिन्त्य शिवे ! शमिताशिवे !
जगति जातमयत्नवशादिदम्
स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन कालकलापि मे ।। २१ ।।

(युगलकम्)

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

मोहः शान्तो गुरुवरमुखाम्नाय तत्त्वोपलम्भात्
मग्नं चेतः समरससमास्वादलोलं चिदब्धौ ।
भावव्रातः प्रशममगमन्निर्विकल्पे समाधौ
सिद्धाभासः स भवतु हि मे कोऽपि संविद्विकासः ।।

क्षीरसागरतरङ्गशीकरासारतारकितचारूमूर्तये ।
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ।।

ऊनाधिकमविज्ञातं पौर्वापर्यविवर्जितम् ।
यच्चावधानरहितं बुद्धेर्विस्खलितं च यत् ।।
तत्सर्वं मम सर्वेश भक्तस्यार्तस्य दुर्मते : ।
क्षन्तव्यं कृपया शंभो ! यतस्त्वं करुणापरः ।।
अनेन स्तोत्रयोगेन तवात्मानं निवेदये ।
पुनर्निष्कारणमहं दुःखानां नैमि पात्रताम् ।। (तिलकम्)

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अव्ययमकुलममेयं
विगलितसदसद्विवेककल्लोलम् ।
जयति प्रकाशविभव-
स्फीतं काल्याः परं धाम ।।

.....

अथ श्रीक्रमस्तोत्र ।।

...

(सृष्टिकली)

कौलार्णवानन्दघनोर्मिरूपा-
मुन्मेषमेषोभयभाजमन्तः ।
निलीयते नीलकुलालये या
तां सृष्टिकालीं सततं नमामि ।। १ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(रक्तकाली)

महाविनोदार्पितमातृचक्र-
वीरेन्द्रकासृग्रसपानसक्ताम् ।
रक्तीकृतां च प्रलयात्यये तां
नमामि विश्वाकृतिरक्तकालीम् ।। २ ।।

(स्थितिनाशकाली)

वाजिद्वयस्वीकृतवातचक्र-
प्रक्रान्तसंघट्टगमागमस्थाम् ।
शुचिर्ययास्तंगमितोर्चिषा तां
शान्तां नमामि स्थितिनाशकालीम् ।। ३ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(यम काली)

सर्वार्थसंकर्षणसंयमस्य-
यमस्य यन्तुर्जगतो यमाय ।
वपुर्महाग्रासविलासरागा-
त्संकर्षयन्तीं प्रणमामि कालीम् ।। ४ ।।

(संहारकाली)

उन्मन्यनन्ता निखिलार्थगर्भा
या भावसंहारनिमेषमेति ।
सदोदिता सत्युदयाय शून्यां
संहारकालीं मुदितां नमामि ।। ५ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(मृत्युकाली)

ममेत्यहंकारकलाकलाप-
विस्फारहर्षोद्धतगर्वमृत्युः ।
ग्रस्तो यया घस्मरसंविदं तां
नमाम्यकालोदितमृत्युकालीम् ।। ६ ।।

(भद्र काली)

विश्वं महाकल्पविरामकल्प-
भवान्तभीमभ्रुकुटिभ्रमन्त्या ।
याश्नात्यनन्तप्रभवार्चिषा तां
नमामि भद्रां शुभभद्रकालीम् ।। ७ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(मार्तण्डकाली)

मार्तण्डमापीतपतङ्गचक्रं
पतङ्गवत्कालकलेन्धनाय ।
करोति या विश्वरसान्तकां तां
मार्तण्डकालीं सततं प्रणौमि ।। ८ ।।

(परमार्क काली)

अस्तोदितद्वादशभानुभाजि
यस्यां गता भर्गशिखा शिखेव ।
प्रशान्तधाम्नि द्युतिनाशमेति
तां नौम्यनन्तां परमार्ककालीम् ।। ९ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(कालाग्निरुद्रकाली)

कालक्रमाक्रान्तदिनेशचक्र-
क्रोडीकृतान्ताग्निकलाप उग्रः ।
कालाग्निरुद्रो लयमेति यस्यां
तां नौमि कालानलरुद्रकालीम् ।। १० ।।

(महाकालकाली)

नक्तं महाभूतलये श्मशाने
दिग्खेचरीचक्रगणेन साकम् ।
कालीं महाकालमलं ग्रसन्तीं
वन्दे ह्यचिन्त्यामनिलानलाभाम् ।। ११ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(महाभैरव-घोर-चण्डकाली)

क्रमत्रयत्वाष्ट्रमरीचिचक्र-
सञ्चारचातुर्यतुरीयसत्ताम् ।
वन्दे महाभैरव घोर चण्ड-
कालीं कलाकाशशशाङ्ककांतिम् ।। १२ ।।

.....

अव्ययमकुलममेयं
विगलितसदसद्विवेककल्लोलम् ।
जयति प्रकाशविभव-
स्फीतं काल्याः परं धाम ।।

.....

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यो विचित्ररससेकवर्धितः
शङ्करेति शतशोऽप्युदीरितः ।
शब्द आविशति तिर्यगाशये-
ष्वप्ययं नवनवप्रयोजनः ॥

ते जयन्ति मुखमण्डले भ्रमन्
अस्ति येषु नियतं शिवध्वनिः ।
यः शशीव प्रसृतोऽमृताशयात्
स्वादु संस्रवति चामृतं परम् ॥

(युगलकम्)

(Meditation for 10 minutes)

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अस्त्यस्मिन्महसा महानिधिरसौ देवो विवस्वान् महान्
यस्मिञ्जाग्रति जाग्रतीव रजनीसुप्ता इमे जन्मिनः ।
किन्त्वेका महती ततो विजयते श्रीदैशिकाङ्घ्रिद्युति-
र्यद्भासाच्छुरितं चिरन्तनतमो हित्वैव जागर्ति सत् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

SECTION II

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

RECITATION OF Ślōkā FROM FOLLOWING SCRIPTURES IS OPTIONAL SUBJECT TO AVAILABILITY OF TIME

.....

1. Śivastōtrāvali
   (every Sunday)
2. Bahurūpagarbha
   (First Sunday)
3. Mahimnastōtra
   (2nd Sunday)
4.. Śrīgurū Gītā
   (3rd & 4th Sunday)

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अथ श्रीबहुरूपगर्भस्तोत्रः ।।

...

त्रिपञ्चनयनं देवं जटामुकुटमण्डितम् ।
चन्द्रकोटिप्रतीकाशं चन्द्रार्धकृतशेखरम् ।।
पञ्चवक्त्रं विशालाक्षं सर्पगोनासमण्डितम् ।
वृश्चिकैरग्निवर्णाभैर्हारेण तु विराजितम् ।।
कपालमालाभरणं खड्गखेटकधारिणम् ।
पाशाङ्कुशधरं देवं शरहस्तं पिनाकिनम् ।।
वरदाभयहस्तं च मुण्डखट्वाङ्गधारिणम् ।
वीणाडमरूहस्तं च घण्टाहस्तं त्रिशूलिनम् ।।
वज्रदण्डकृताटोपं परश्वायुधहस्तकम् ।
मुद्गरेण विचित्रेण वर्तुलेन विराजितम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सिंहचर्मपरीधानं गजचर्मोत्तरीयकम् ।
अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ।।
ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत् ।
आपीतं पूर्ववक्त्रं तु नीलोत्पलदलप्रभम् ।।
दक्षिणं तु विजानीयाद्वामं चैव विचिन्तयेत् ।
दाडिमीकुसुमप्रख्यं कुङ्कुमोदकसंनिभम् ।।
चन्द्रार्बुदप्रतीकाशं पश्चिमं तु विचिन्तयेत् ।
स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम् ।।
ध्यायेद्वै यस्तु युक्तात्मा क्षिप्रं सिध्यति मानवः ।
या सा पूर्वं मया ख्याता अघोरी शक्तिरुत्तमा ।।
भैरवं पूजयित्वा तु तस्योत्सङ्गतां स्मरेत् ।
यादृशं भैरवं रूपं भैरव्यास्तादृगेव हि ।।
ईषत्करालवदनां गम्भीरविपुलस्वनाम् ।
प्रसन्नास्यां सदाध्यायेद्भैरवीं विस्मितेक्षणाम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ नमः श्रीस्वच्छन्दभैरवाय ।।

.....

ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम् ।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ।।
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ।।

श्रीदेव्युवाच ।।

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च ।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ।।
च्छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो !
येनाऽऽयासेनरहितो निर्दोषश्च भवेन्नरः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीभैरव उवाच ।।

श्रृणु देवि! परं गुह्यं रहस्यं परमाद्भुतम् ।
सर्वपापप्रशमनं सर्वदुःखनिवारणम् ।।
प्रायश्चित्तेषु सर्वेषु तीव्रेष्वऽपि विमोचनम् ।
सर्वच्छिद्रापहरणं सर्वार्तिविनिवारकम् ।।
समयोल्लङ्घने घोरे जपादेव विमोचनम् ।
भोगमोक्षप्रदं देवि ! सर्वसिद्धिफलप्रदम् ।।
शतजाप्येन शुद्धन्ति महापातकिनोऽपि ये ।
तदऽर्धं पातकं हन्ति तत्पादेनोपपातकम् ।।
कायिकं वाचिकं चैव मानसं स्पर्शदोषजम् ।
प्रमादादिच्छया वाऽपि सकृज्जाप्येन शुद्ध्यति ।।
यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः ।
नित्ये नैमित्तिके काम्ये परस्याप्याऽत्मनोऽपि वा ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरकम् ।
द्रव्यहीने मन्त्रहीने यज्ञयोगविवर्जिते ।।
भक्तिश्रद्धाविरहिते शुद्धिशून्ये विशेषतः ।
मनोविक्षेपदोषे च विलोपे पशुवीक्षिते ।।
विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु ।
नातः परतरो मन्त्रो नातः परतरा स्तुतिः ।।
नातः परतरा काचित्सम्यक्प्रत्यङ्गिरा प्रिये !
इयं समयविद्यानां राजराजेश्वरीश्वरि !
परमाऽप्यायनं देवि ! भैरवस्य प्रकीर्तितम् ।
प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्धनम् ।।
स्तवराजमिमं पुण्यं श्रृण्वष्वाऽवहिता प्रिये ! ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अस्य श्रीबहुरूपभट्टारकस्तोत्रस्य श्रीवामदेव ऋषिः
अनुष्टुप्छन्दः श्रीबहुरूपभट्टारको देवता
आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं
चतुर्वर्गसिद्ध्यर्थे पाठे विनियोगः ।।

(अघोरमन्त्रेण न्यासं कृत्वा) ।।

अघोरेभ्यो	अंगुष्ठाभ्यां नमः ।
अथ घोरेभ्यो	तर्जनीभ्यां नमः ।
घोरघोरतरीभ्यश्च	मध्यमाभ्यां नमः ।
सर्वतः	अनामिकाभ्यां नमः ।
शर्व! सर्वेभ्यो	कनिष्ठिकाभ्यां नमः ।
नमस्ते रुद्ररूपेभ्यः	करतलकरपृष्ठाभ्यां नमः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अघोरेभ्यो हृदयाय नमः ।
अथ घोरेभ्यो शिरसे स्वाहा ।
घोरघोरतरीभ्यश्च शिखायै वषट् ।
सर्वतः कवचायहुम् ।
शर्व! सर्वेभ्यो नेत्राभ्यां वौषट् ।
नमसते रुद्ररूपेभ्यः अस्त्राय फट् ।।

प्राणायामः कुर्यात् ।।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरीभ्यश्च ।
सर्वतः शर्व! सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ।।१-२-३।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अथ ध्यानम् ।।

वामे खेटकपाशशार्ङ्गविलसद्दण्डं च वीणाण्टिके
बिभ्राणं ध्वजमुद्गरौ स्वनिभदे व्यङ्कं कुठारं करे ।
दक्षेस्यऽङ्कुशकन्दलेषुडमरून्वज्रत्रिशूलाभयान्नु-
द्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ।।

अथ गायत्री ।।

ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि ।
तन्नोऽघोरः प्रचोदयात् ।। ३ ।।

अथ मूलम् ।।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरीभ्यश्च ।
सर्वतः शर्व! सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ।।१०८।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ श्रीभैरवः ।।

ॐ नमः परमाकाशशायिने परमात्मने ।
शिवाय परसंशान्तनिरानन्दपदाय ते ।।
अवाच्यायाप्रमेयाय प्रमात्रे विश्वहेतवे ।
महासामान्यरूपाय सत्तामात्रैकरूपिणे ।।
घोषादिदशधाशब्दबीजभूताय शम्भवे ।
नमः शान्तोग्रघोरादिमन्त्रसन्दर्भगर्भिणे ।।
रेवतीसङ्गविस्रम्भसमाश्लेषविलासिने ।
नमः समरसास्वादपरानन्दोपभोगिने ।।
भोगपाणे नमस्तुभ्यं योगीशैः पूजितात्मने ।
द्वयनिर्दलनोद्योगसमुल्लासितमूर्तये ।।
सरत्प्रसरविक्षोभविसृष्टाखिलजन्तवे ।
नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

घोरसंसारसंभोगदायिने स्थितिकारिणे ।
कलादिक्षितिपर्यन्तपालिने विभवे नमः ।।
रेहणाय महामोहध्वान्तविध्वंसहेतवे ।
हृदयाम्भोजसंकोचभेदिने शिवभानवे ।।
भोगमोक्षफलप्राप्तिर्हेतुयोगविधायिने ।
नमः परमनिर्वाणदायिने चन्द्रमौलये ।।
घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्तये ।
नमः सर्वाय शर्वाय सर्वपाशापहारिणे ।।
रवणाय रवान्ताय नमस्ते रावराविणे ।
नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ।।
घोषाय परनादान्तश्चराय खचराय ते ।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ।।
रमणाय रतीशाङ्गदाहिने चित्रकर्मिणे ।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

तमः पारप्रतिष्ठाय सर्वान्तपदगाय ते ।
नमः समस्ततत्त्वाध्वव्यापिने चित्स्वरूपिणे ।।
रेवद्वराय रुद्राय नमस्ते रूपरूपिणे ।
परापरपरिस्पन्दमन्दिराय नमो नमः ।।
भरिताखिलविश्वाय योगगम्याय योगिने ।
नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ।।
चर्च्याय चर्चनीयाय चर्चकाय चरायते ।
रवीन्दुसन्धिसंस्थाय महाचक्रेश ते नमः ।।
सर्वानुस्यूतरूपाय सर्वाच्छादकशक्तये ।
सर्वभक्षाय शर्वाय नमस्ते सर्ववेदिने ।।
रम्याय वल्लभाक्रान्तदेहार्धाय वियोगिने ।
नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ।।
तन्महेशाय तत्त्वार्थवेदिने भववेदिने ।
महाभैरवनाथाय भक्तिगम्याय ते नमः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

शक्तिगर्भप्रबोधाय शरण्यायाऽशरीरिणे ।
शान्तिपुष्ट्यादिसाध्यार्थसाधकाय नमोऽस्तु ते ।।
रवत्कुण्डलिनीगर्भप्रबोधप्राप्तशक्तये ।
उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ।।
समस्तव्यस्तसंग्रस्तरश्मिजालोदरात्मने ।
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ।।
रेवारणिसमुद्भूतवह्निज्वालावभासिने ।
घनीभूतविकल्पात्मविश्वबन्धविलापिने ।।
भोगिनीस्यन्दनारूढिप्रौढिमालब्धगर्विणे ।
नमस्ते सर्वभक्ष्याय परमामृतलाभिने ।।
न फ कोटिसमावेशभरिताखिलसृष्टये ।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ।।
महामोहमलाक्रान्तजीववर्गावबोधिने ।
महेश्वराय जगतां नमः कारणबन्धवे ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये ।
नमस्तेऽस्तु महादेवनाम्ने परस्वधात्मने ।।
रुग्द्राविणे महावीर्यरुरुवंशविनाशिने ।
रुद्राय द्राविताशेषबन्धनाय नमोऽस्तु ते ।।
द्रवत्पररसास्वादचर्वणोद्युक्तशक्तये ।
नमस्त्रिदशपूज्याय सर्वकारणहेतवे ।।
रूपातीत नमस्तुभ्यं नमस्ते बहुरूपिणे ।
त्र्यम्बकाय त्रिधामान्तश्चारिणे च त्रिचक्षुषे ।।
पेशलोपायलभ्याय भक्तिभाजां महात्मनाम् ।
दुर्लभाय मलाक्रान्तचेतसां तु नमोनमः ।।
भवप्रदाय दुष्टानां भवाय भवभेदिने ।
भव्यानां तन्मयानां तु सर्वदाय नमोनमः ।।
अणूनां मुक्तये घोरघोरसंसारदायिने ।
घोरातिघोरमूढानां तिरस्कर्त्रे नमोनमः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सर्वकारणकलापकल्पितो-
ल्लाससंकुलसमाधिविष्ठराम् ।
हार्दकोकनदसंस्थितामपि
तां प्रणौमि शिववल्लभामजाम् ।।
सर्वजन्तुहृदयाब्जमण्डलो-
द्भूतभावमधुपानलुम्पटाम् ।
वर्णभेदविभवान्तरस्थितां
तां प्रणौमि शिववल्लभामजाम् ।।

.....

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

इत्येवं स्तोत्रराजेशं महाभैरवभाषितम् ।
योगिनीनां परं सारं न दद्याद्यस्य कस्यचित् ।। १ ।।
अदीक्षिते शठे क्रूरे निःसत्ये शुचिवर्जिते ।
नास्तिके च खले मूर्खे प्रमत्ते विप्लुतेऽलसे ।। २ ।।
गुरुशास्त्रसदाचारदूषके कलहप्रिये !
निन्दके चुम्भके क्षुद्रेऽसमयज्ञे च दांभिके ।। ३ ।।
दाक्षिण्यरहिते पापे धर्महीने च गर्विते ।
भक्तियुक्ते प्रदातव्यं न देयं परदीक्षिते ।। ४ ।।
पशूनां सन्निधौ देवि! नोच्चार्यं सर्वथा क्वचित् ।
अस्य स्मृतिमात्रेण विघ्ना नश्यन्त्यनेकशः ।। ५ ।।
गुह्यका यातुधानाश्च वेताला राक्षसादयः ।
डाकिन्यश्च पिशाचाश्च क्रूरसत्त्वाश्च पूतनाः ।। ६ ।।
नश्यन्ति सर्वे पठितस्तोत्रस्यास्य प्रभावतः ।
खेचरी भूचरी चैव डाकिनी शाकिनी तथा ।। ७ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ये चान्ये बहुधा भूता दुष्टसत्त्वा भयानकाः ।
व्याधिदौर्भिक्षदौर्भाग्यमारिमोहविषादयः ।। ८ ।।
गजव्याघ्रादयोभीता पलायन्ते दिशो दश ।
सर्वे दुष्टाः प्रणश्यन्ति चेत्याज्ञा पारमेश्वरी ।। ९ ।।

इति श्रीललितस्वच्छन्दे श्रीबहुरूपगर्भस्तोत्रराजः संपूर्णः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अथ शिवमहिमस्तोत्रम् ।।

....

आधीनामगदं दिव्यं व्याधीनां मूलकृन्तनम् ।
उपद्रवानां दलनं महादेवमुपास्महे ।। १० ।।

ॐ महिम्नः पारं ते परमऽविदुषो यद्यऽसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन्-
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ।। १ ।।

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतित न मनः कस्य न वचः ।। २ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

मधुस्फीता वाचाः परमममृतं निर्मितवत-
स्तव ब्रह्मन् किं वागऽपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन ! बुद्धिर्व्यवसिता ।। ३ ।।

तवैश्यर्य्यं यत्तज्जगदुदयरक्षाप्रलयकृत्-
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन्वरद ! रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ।। ४ ।।

किमीहः किंकायः स खलु किमुपायस्त्रिभवनं
किमाधारो धाता सृजति किमुपादानमिति च ।
अतर्क्यैश्वर्य त्वय्यऽनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम् ।। ५ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अजन्मानो लोकाः किमऽवयववन्तोऽपि जगता-
मधिठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ।। ६ ।।

त्रयी सांख्यं योगः पशुपतिमतं वैष्णमिति
प्रभिन्ने प्रस्थाने परमिदमधः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ।। ७ ।।

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ।। ८ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ध्रुवं कश्चित्सर्वं सकलमपरस्तु ध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन्पुरमथन ! तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ।। ९ ।।

तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः ।
ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां गिरिश ! यत्-
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ।। १० ।।

अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर ! विस्फूर्जितमिदम् ।। ११ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अमुष्य त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचिलताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमपचितो मुह्यति खलः ।। १२ ।।

यदृद्धिं सुत्राम्णो वरद ! परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ।
न तच्चित्रं तस्मिन्वरिवसितरि त्वच्चरणयो-
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ।। १३ ।।

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयन ! विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते व श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ।। १४ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्-
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ।। १५ ।।

मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यऽनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ।। १६ ।।

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघु दृष्टः शिरसि ते ।
जगद्द्वीपाकारं जलधिवलयं तेन कृतिमि-
त्यनेनैवोन्नेयं धृतमहिम ! दिव्यं तव वपुः ।। १७ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

रथःक्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्रा प्रभुधियः ।। १८ ।।

हरिस्ते साहस्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुष-
स्त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ।। १९ ।।

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वांसंप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ।। २० ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद ! सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ।। २१ ।।

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुर्मृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ।। २२ ।।

स्वलावण्याशंसा धृतधनुष्यमऽहनाय तृणवत्-
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
दवैति त्वामद्धाबत वरद मुग्धा युवतयः ।। २३ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः सृगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ।। २४ ।।

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः ।
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्ज्याऽमृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ।। २५ ।।

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिछिन्नामेवं त्वयि परिणतां बिभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ।। २६ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

त्रयीं तिस्रो वृत्तिस्त्रिभुवनमथो त्रीनपि सुरा-
कराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरनुरन्धानमणुभिः
समस्तव्यस्तं त्वां शरणद गृणात्योमिति पदम् ।। २७ ।।

भवः शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योस्मि भवते ।। २८ ।।

वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे ! नेवाहं क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यतनुरहमग्रेप्यनति मान्-
महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि ।। २९ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति सर्वाय च नमः ।। ३० ।।

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ।। ३१ ।।

श्रीपुष्पदन्त मुखपङ्कजनिर्गतेन स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणिते भवति भूतपतिर्महेशः।।

इति श्रीपुष्पदन्तविरचितं शिवमहिमस्तोत्रम् संपूर्ण्म ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीगुरुगीता

नमामि सद्गुरुं शांतं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं धर्मकामार्थसिद्धयेः ।। १ ।।
श्रीगुरुं परमानन्दं वन्दाम्यानन्दविग्रहम् ।
यस्य सन्निधिमात्रेण चिदानन्दायते परम् ।। २ ।।
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशिलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ।। ३ ।।
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।। ४ ।।
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुःसाक्षान्महेश्वरः ।
गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ।। ५ ।।
नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ।। ६ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते ।। ७ ।।
स्वतंत्राय दयाक्लृप्तविग्रहाय परात्मने ।
परतंत्राय भक्तानां भव्यानां भव्यरूपिणे ।। ८ ।।
ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनाम् ।
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।। ९ ।।
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदा सच्चित्तरूपेण करोमि तवशासनम् ।। १० ।।
प्रकाशानन्दनाथं च विमर्शानन्दनाथकम् ।
आनन्दानन्दनाथं च दिव्यौघं गुरुमण्डलम् ।। ११ ।।
श्रीसत्यानन्दनाथाह्वं श्रीज्ञानानन्दनाथकम् ।
श्रीपूर्णानन्दनाथं च सिद्धौघान्पूजयाम्यहम् ।। १२ ।।
प्रतिभानन्दनाथाख्यं स्वभावानन्दनाथकम् ।
श्रीसुधानन्दनाथाह्वं मानवौघान्गुरून्भजे ।। १३ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदम् ।
शास्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ।। १४ ।।
येन प्रकाशितं ज्योतिः शिष्यमोहतमोऽपहम् ।
कारुण्यामृतपूर्णाय तस्मै श्रीगुरवे नमः ।। १५ ।।
आब्रह्मस्तम्भपर्यन्तं यस्य मे गुरुसन्ततिः ।
तस्य मे सर्वशिष्यस्य को न पूज्योमहीतले ।। १६ ।।
गुरुः शिवः समाख्यातो गुरुः परमकारणम् ।
गुरौ तुष्टे जगत्तुष्टं सदेवासुरमानुषम् ।। १७ ।।
गुरुरेव परो मंत्रो गुरुरेव परो जपः ।
गुरुरेव परा विद्या नास्ति किंचिद्गुरुं विना ।। १८ ।।
श्रीगुरुं द्विभुजं शान्तं वराभयकाराम्बुजम् ।
पूर्णेन्दुवदनाम्बोजं हसन्तं शक्तिसंयुतम् ।। १९ ।।
श्वेतवस्त्रपरीधानं नानालङ्कारभूषणम् ।
आनन्दमुदिते देवं ध्यायेत्पंकजविष्टरे ।। २० ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
उभयोरन्तरं नास्ति गुरोरपि शिवस्य च ।। २१ ।।
गुरुः शिवगतो ज्ञेयः शिवोगुरुमुखोद्गतः ।
यो गुरुः स शिवः साक्षात्पूजनीयः प्रयत्नतः ।। २२ ।।

गोभिर्यस्य निरन्तराभिरभितो द्वैतान्धकारक्षयात्
सर्वाशाप्रविकासनेन पुरुषाः सुप्ताः प्रबुद्धाः कृताः ।
पादा तस्य जयन्ति सद्गुरुमहाहंसस्य यत्प्रक्रमैः ।
भिन्ना मन्मतिषट् पदी रसयति श्रीशैवशास्त्राब्जिनीम्।।२३

कर्त्तव्याकरणानि तद्गुरु पदाम्बोजस्तवे चातुरी
जिह्वीभूयबिवर्जितात्मगुणसंयोगैर्भवद्भिः ध्रुवम् ।
तर्कव्याकरणागमैः सहमहापुण्योपलभ्यैर्यतो ।
यूय यत्प्रतिपादितैः सफलतां सेवध्वमस्मिन्भवे ।। २४

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम्
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ।। २५ ।।

तावदात्तिर्भयं तावत्तावच्छोकभ्रमादयः ।
यावन्नायाति शरणं श्रीगुरोः पादुकास्मृतिम् ।। २६ ।।

श्रीदेव्युवाच

प्रायश्चित्तविहीनस्य फलं भोगाय केवलम् ।
सर्वसाक्षी महादेवो नरकानसृजत्पुनः ।। २७ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमिहैव तु ।
कृतस्य कर्मणः कुर्यादवलेपो भवेद्यदि ।। २८ ।।
प्रामादिकमहादोषप्रविलापनकारणम् ।
प्रायश्चित्तं परं सत्यं श्रीगुरोःपादुकास्मृतिः ।। २९ ।।
त्वयैवोक्तं महेशान कथं स्मर्तव्यमीश्वर ।
वद मे कृपया देव! श्रीगुरोः पादुकास्मृतिः ।। ३० ।।

श्रीभैरव उवाच

श्रृणु देवि प्रवक्ष्यामि श्रीगुरोः पादुकास्मृतिम् ।
प्रायश्चित्तविहीनानां सर्वपापहरं कलौ ।। ३१ ।।
यस्य श्रीपादरजसा रञ्जयन्मस्तकं शिवः ।
रमते सहपार्वत्या तस्य श्रीपादुकास्मृतिः ।। ३२ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यो मोहतमसाक्रान्तमुद्धरत्यन्धकूपतः ।
केवलं कृपया नाथः तस्य श्रीपादुकास्मृतिः ।। ३३ ।।
यस्य त्रैलोक्यमखिलं सच्चिदानन्दलक्षणम् ।
पूर्यते स्वगुणैःशक्त्या तस्य श्रीपादुकास्मृतिः ।। ३४ ।।
यस्य त्रैलोक्यमखिलं वेशतिष्ठत्यशेषतः ।
सदृष्टि पातमात्रेण तस्य श्रीपादुकास्मृतिः ।। ३५ ।।
यस्मै सर्वस्वमात्मानमेकीकृत्यापिभक्तितः ।
समर्पयति सच्छिष्यस्तस्य श्रीपादुकास्मृतिः ।। ३६ ।।
यमाश्रित्यात्मविज्ञानं संविदे मृगयामहे ।
हेतुकैर्मोषितं दोषैस्तस्य श्रीपादुकास्मृतिः ।। ३७ ।।
यस्मिन्सृष्टिस्थितिध्वंसपिधानानुग्रहात्मकम् ।
प्रकाश्यते पञ्चकृत्यं तस्य श्रीपादुकास्मृतिः ।। ३८ ।।
मूले हृदि ललाटे च द्वादशांते परःशिवः ।
यस्याज्ञां पालयन्नास्ते तस्य श्रीपादुकास्मृतिः ।। ३९ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यस्य पादतले सिन्धु. पादाग्रे कुलपर्वताः ।
गुल्फे नक्षत्रवृन्दानि ास्य श्रीपादुकास्मृतिः ।। ४० ।।
वनस्पतिस्तथा रोम्नि शतरुद्राश्चजङ्घयोः ।
जान्वोः त्रिदशसंदोहास्तस्य श्रीपादुकास्मृतिः ।। ४१ ।।
आधरे परमशक्तिः नाभिचक्रेहृदाज्ञयोः ।
योगिनीनां चतुःषष्टिस्तस्य श्रीपादुकास्मृतिः ।। ४२ ।।
हृदये मातरःकण्ठे शिरःपीठोपपीठयोः ।
चिबुके यस्य देवाश्च तस्य श्रीपादुकास्मृतिः ।। ४३ ।।
यज्ञःकपोलयुग्मे च जिह्वाग्रे च सरस्वती ।
यस्य दन्तेषु मंत्राश्च तस्य श्रीपादुकास्मृतिः ।। ४४ ।।
स्कन्दे च क्षेचरा देवास्त्रिनेत्रे तेजसञ्चयः ।
लिपित्रयं ललाटे च तस्य श्रीपादुकास्मृतिः ।। ४५ ।।
इडापिंगलयोरत्र गंगा च यमुना तथा ।
मध्ये सरस्वती यस्य तस्य श्रीपादुकास्मृतिः ।। ४६ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

आद्यन्ते दृढभेदस्य पशुपाशविमोचनम् ।
यामाहुःशाम्भवी वाचस्तस्य श्रीपादुकास्मृतिः ।। ४७ ।।
ऊर्वोश्च सिद्धवीरेन्द्राः लिंगमूले च भैरवः ।
लिंगाग्रेऽप्सरसोयस्य तस्य श्रीपादुकास्मृतिः ।। ४८ ।।
गुरुःशिवो गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुः परः ।
गुरुरग्निर्गुरुर्मन्त्रो भानुरिन्द्रस्तथैव च ।। ४९ ।।
अन्यत्सर्वं सप्रपञ्चं निष्प्रपञ्चं गुरुःस्मृतः ।
तस्माच्छ्रीपादुकाध्यानं सर्व पापनिकृन्तनम् ।। ५० ।।
श्रीगुरोः पादुकास्तोत्रं प्रातरुत्थाय यः पठेत् ।
नश्यन्ति सर्वपापानि वह्निनातूलराशिवत् ।। ५१ ।।
पठितव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः ।
भोगमोक्षार्थिभिस्तस्मात्सद्भिरागमपारगैः ।। ५२ ।।
गुरुगम्यं भवेत्सर्वं गुरुरेव प्रजापतिः ।
गुरौ तुष्टे परस्तुष्टस्तस्मै श्रीगुरवे नमः ।। ५३ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

येनाभेदप्रकाशेन भेदध्वान्तं विलापितम् ।
नौमि तं सद्गुरुं हंसं हृत्पङ्कजविकासकम् ।। ५४ ।।
महारोगे महोत्पाते महादुःखे महाभये ।
महापदि महापापे स्मृता रक्षति पादुका ।। ५५ ।।
गुरुरेव परादेवी गुरुरेव परागतिः ।
गुरुमुल्लङ्घ्य यः कुर्यात्किंचित्स निरयंव्रजेत् ।। ५६ ।।
श्रीमत्परंब्रह्मगुरुं नमामि
श्रीमत्परंब्रह्मगुरुं भजामि ।
श्रीमत्परंब्रह्मगुरुं वदामि
श्रीमत्परंब्रह्मगुरुं श्रयामि ।। ५७ ।।
गुकारस्त्वन्धकारः स्याद्रुकारस्तन्निरोधकः ।
अन्धकारनिरोधेन गुरुरित्यभिधीयते ।। ५८ ।।
गुरवो बहवः सन्ति शिष्यवित्तापहारकाः ।
दुर्लभोऽयं गुरुर्देवी शिष्यसन्तापहारकः ।। ५९ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

वन्दे श्रीविमलं प्रसन्नवदनं कारुण्यरूपं परं
ध्यानासक्तहृदम्बुजं सुरसरिन्मौलिं त्रिनेत्रं हरम् ।
त्रैगुण्यावृतमानसं भगवते भक्तिप्रदं चिन्मयम्
ध्यायेत्फुल्लसरोरुहाक्षि सततं देवं शिवाख्यं गुरुम्।।
यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् ।
स एव सर्वसंपत्तिस्तस्मै श्रीगुरवे नमः ।। ६१ ।।
चैतन्यं सुशिवं शांतं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ।। ६२ ।।
येनस्मृतेन भवपाशनिकृन्तनैका
संवित्समुल्लसति सर्वगता शिवाख्या ।
नृणामनुत्तरपदप्रविकासहेतुः
तस्मै नमोऽस्तु गुरवै परमेश्वराय ।। ६३ ।।
घोरसंसारकान्तारसमुत्तारैकहेतवे ।
नमस्ते चित्स्वरूपाय शिवाय गुरवे नमः ।। ६४ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अहंममेतिविच्छन्नमदौघोऽज्ञानवारणः ।
निहतो लीलया येन गुरुसिंहं नमामि तम् ।। ६५ ।।
नमोऽस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे ।
यस्य वागमृतं हंति विषं संसारसंज्ञकम् ।। ६६ ।।
कोटिकोटिमहादानात्कोटिकोटिमहाव्रतात् ।
कोटिकोटिमहायज्ञात्परा श्रीपादुकास्मृतिः ।। ६७ ।।
कोटिमंत्रजपात्कोटिपुण्यतीर्थावगाहनात् ।
कोटिदेवार्चनाद्देवि पराश्रीपादुकास्मृतिः ।। ६८ ।।
सकृच्छ्रीपादुकां देवि योवा जपति भक्तितः ।
स सर्वपापरहितः प्राप्नोति परमां गतिम् ।। ६९ ।।
श्रीस्वामिचरणाम्बोजं यस्यां दिशि विराजते ।
तस्यै दिशे नमस्कुर्याद्भक्त्या प्रतिदिनं प्रिये ।। ७० ।।
गुरुमूला क्रियाः सर्वालोकेऽस्मिन्कुलनायिके ।
तावत्सेव्यो गुरुर्नित्यं सिद्ध्यर्थं भक्तिसंयुतैः ।। ७१ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

तावद्भ्रमति संसारे सर्वदुःखवशीकृतः ।
यावन्नायाति शरणं श्रीगुरुं भक्तिवत्सलम् ।। ७२ ।।
तावदाशोधयेच्छिष्यः सुप्रसन्नो यथा गुरुः ।
गुरौ प्रसन्ने शिष्यस्य सद्यः पापक्षयो भवेत् ।। ७३ ।।
यदिवा परितुष्टेन गुरुणा यत्रकुत्रचित् ।
मुक्तोऽसीति समादिष्टः शिष्यो मुक्तो भवेत्प्रिये ।। ७४ ।।
अथवा निष्प्रपञ्चेन धाम्नाकेनचिदीश्वरि ।
करोमि गुरुरूपेण पशुपाशविमोचनम् ।। ७५ ।।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकास्यन्ते महात्मनः ।। ७६ ।।
गुरुभक्त्या यथा देवि प्राप्यन्ते सर्वसिद्धयः ।
यज्ञदानतपस्तीर्थव्रताद्यैर्न तथा प्रिये ।। ७७ ।।
किं तीर्थाद्यैर्महायासैः किं व्रतैः कायशोषणैः ।
निर्व्याजसेवां देवेशि भक्त्याकुर्वन्ति ये गुरौ ।। ७८ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

कायक्लेशेन महता तपसावापि यत्फलम् ।
तत्फलं लभते देवि सुखेन गुरुसेवया ।। ७९ ।।
न योगो न तपो नार्चाक्रमः कोऽपि प्रणीयते ।
अमाये कुलमार्गेऽस्मिन् भक्तिरेका विशिष्यते ।। ८० ।।
गुरौ मनुष्यबुद्धिं च मंत्रे चाक्षरबुद्धिमान् ।
प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ।। ८१ ।।
गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः ।
शिवो रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।। ८२ ।।
गुर्वर्थं धारयेद्देहं तदर्थं च धनं जयेत् ।
निजप्राणान्परित्यज्य गुरुकार्यं समाचरेत् ।। ८३ ।।
गुर्वाग्रे न तपः कुर्यान्नोपवासादिकं व्रतम् ।
तीर्थयात्रां च नोकुर्यान्नाप्नुयादात्मशुद्धये ।। ८४ ।।
गुरौ सन्निहिते यस्तु पूजयेयमीश्वरि ।
स याति नरकं घोरं सा पूजा निष्फलाभवेत् ।। ८५ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

दर्शनार्थं गुरौ गच्छन् शिष्यशुश्रूषुरम्बिके ।
पदे पदेऽश्वमेधस्य फलमाप्नोति नित्यशः ।। ८६ ।।
केवलं गुरुशुश्रूषा मत्कृपाकारिणी प्रिये ।
सद्भक्तिसहिता सा च सर्वकामफलप्रदा ।। ८७ ।।
क्षीयन्ते सर्वपापानि वर्धन्ते पुण्यराशयः ।
सिद्ध्यन्ते सर्वकार्याणि सद्गुरोर्दर्शनात्प्रिये ।। ८८ ।।
श्रीगुरोरर्चनं पूजा गुरोर्नामस्मृतिर्जपः ।
सर्वाज्ञाकरणं कृत्यं शुश्रूषा भजनं गुरौ ।। ८९ ।।
विनोपचारं नो तिष्ठेद्गुर्वाग्रे नेच्छया विशेत् ।
मुखावलोकी सेवेत तदुक्तं च समाचरेत् ।। ९० ।।
सदसद्यद्गुरुर्ब्रूयात्तत्कार्यमविशंकया ।
निग्रहेऽनुग्रहे वापि गुरुरेव हि कारणम् ।। ९१ ।।
गच्छंस्तिष्ठन् स्वपञ्जाग्रपञ्जुह्वन् प्रपूजयेत् ।
गुर्वाज्ञामेव कुर्वति तद्गतेनान्तरात्मना ।। ९२ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सर्वदा निवसेद्भक्त्या शिष्यः श्रीगुरुसंनिधौ ।
छायाभूमिपरित्यागी नेतरस्त्वतिभक्तिमान् ।। ९३ ।।
अधःस्थे तु गुरावूर्ध्वे न तिष्ठेत्तुकदाचन ।
न गच्छेदग्रतस्तस्य न विशेदुत्थिते गुरौ ।। ९४ ।।
विषमे वा समे वापि स्थाने तिष्ठन्तमीश्वरि ।
श्रीगुरुं न त्यजेद्देवि तदातिष्ठेद्व्रजेत्ततः ।। ९५ ।।
किं बहूक्तेन देवेशि सद्गुरुः परमेश्वरः ।
तत्सेवैव परं कार्या भक्त्या प्राणैर्धनैरपि ।। ९६ ।।
संसारजनकारुण्याद्दयया परमेश्वरः ।
गुरुरूपेण सर्वत्र स्थितो नास्त्यत्र संशयः ।। ९७ ।।
कियद्वक्ष्यामि ते भद्रे माहात्म्यं सद्गुरोःपरम् ।
गुरुभक्तिविहीनानां न मुक्तिर्बहुजन्मभिः ।। ९८ ।।
इहलोके भोगसिद्धिर्परत्र स्वर्गमुक्तिभूः ।
गुरुभक्त्यैव देवेशि नान्या पन्था इति श्रुतिः ।। ९९ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

शुक्लाम्बरधरं विष्णुं शशिवर्णं सुशोभितम् ।
वरं च वामहस्तेन तत्त्वमुद्रां च दक्षिणे ।। १०० ।।
अमलविमलगात्रं ज्योतिरेकप्रकाशम् ।
प्रभावविभवसाक्षी सच्चिदानन्द रूपम् ।।
समरसस्वस्वभावं क्षेममानन्दनित्यम्
सकलभुवनवासं सद्गुरं तं नमामि ।। १०१ ।।
सहस्रदलपङ्कजे सकलशीतरश्मिप्रभम्
वराभयकराम्बुजं विमलगंधपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणम्
स्मरेच्छिरसि संततंतदभिधानपूर्वं गुरुम्।। १०२ ।।
निःसक्तमणिपादुकानियमिताघकोलाहलं
स्फुरत्किसलयारुणं नखसमुल्लसच्चन्द्रकम् ।
परामृतसरोवरोद्यतसरोजसद्रोचिषम्
भजामि शिरसिस्थितं गुरुपादारबिन्दद्वयम् ।।१०३।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीनाधादिगुरत्रयं गणपतिं पीठत्रयं भैरवम् ।
सिद्धेभ्यो वटुकत्रयं पदयुगं दूतीक्रमं शाम्भवम् ।।
वीरश्चाष्टचतुष्टषष्टिनवकं वीरावलीपञ्चकम् ।
श्रीमन्मालिनिमंत्रराजसहितं वन्दे गुरोर्मण्डलम् ।।

इति श्रीकौलार्णव महातंत्रे श्रीगुरुगीता समाप्तेतिशिवम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

SECTION III

Compulsory Recitation

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

ॐ गूंगं गणपतये नमः ।।१०।।

ॐ सद्गुरूमहाराज की जय जय जय।।१०।।

आञ्जनेयाय रामदूताय महाबलाय स्वाहा ।१०।
महाबलाय स्वाहा महाबलाय स्वाहा ।।१०।।

ॐ नमःशिवाय ॐ नमःशिवाय
ॐ नमःशिवाय ॐ नमःशिवाय ।।१०।।

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरीभ्यश्च ।
सर्वतः शर्व! सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः ।।१०।।

ॐ जुं सः अमृतेश्वरभैरवाय नमः ।। १० ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अन्तरालीनतत्त्वौघं चिदानन्दघनं महत् ।
यत्तत्त्वं शैवधामाख्यं तदोमित्यभिधीयते ।।

तादृगात्मपरामर्शशालिनी शक्तिरस्य या ।
देशकालापरिच्छिन्ना सा जुंशब्देनकथ्यते ।।

सिसृक्षोल्लेखनिर्माणशक्तित्रितयनिर्भरा ।
जगतो येशिताशक्तिः सा स इत्युच्यते स्फुटम्।।

स्वशक्त्यभिव्यक्तिमये मोक्षेऽस्यैश्वर्ययोगतः ।
स्वोपासकानाममृतेश्वरत्वं तस्य सुस्फुटम्।।

नीलहर्शादिभेदेन यद्बाह्याभ्यन्तरं जगत् ।
अहमित्यामृशन्पूर्णो भैरवः समुदाहृतः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

देहप्राणसुखादीनां न्यग्भावाद्भक्तसंहते ।
या चिदात्मनि विश्रान्तिर्नमःशब्देन सोच्यते ।।

त्रयी सप्तचतुर्युग्ममये त्रितयवर्त्मनि ।
स्थितो यः शक्तिसहितः स जयत्यमृतेश्वरः ।।

आत्मेन्दुधामनि युगेशनरेशपुत्र-
चित्रां त्रिशूलबिलधामनि सृष्टशक्तिम् ।
वैसर्गिके चितिपदेऽप्यथपुण्डरीकां
काञ्चित्परां त्रिकपरां प्रणमामि देवीम् ।।

श्रीमत्सदाशिवपदेऽपि महोग्रकाली-
भीमोत्कटभ्रुकुटिरेष्यति भङ्गभूमिः ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

इत्याकलय्यपरमां स्थितिं-एत्य काल-
संकर्षिणीं भगवतीं हठतोऽधितिष्ठेत् ।।

तन्मध्ये तु परादेवी दक्षिणे च परापरा ।
अपरा वामश्रृंगे तु मध्यश्रृंगोर्ध्वतः श्रृणु ।।
या सा संकर्षिणीकाली परातीता व्यवस्थिता ।।

कृत्वाधारधरां चमत्कृतिरसप्रोक्षाक्षणक्षालिता-
मात्तैर्मानसतः स्वभावकुसुमैः स्वामोदसंदोहिभिः ।
आनन्दामृतनिर्भरस्वहृदयानर्घार्घपात्रक्रमात्
त्वां देव्या सह देहदेवसदने देवार्चयेऽहर्निशम् ।।
नानास्वादरसामिमां त्रिजगतीं हृच्चक्रयन्त्रार्पिता-
मूर्ध्वाधस्तविवेकगौरवभरान्निष्पीड्यनिःष्यन्दितम् ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

यत्संवित्परमामृतं मृतिजराजन्मापहं जृम्भते
तेन त्वां हविषा परेण परमे सन्तर्पयेऽहर्निशम् ।।

कालाग्निरुद्रात्प्रसृतं च तेजो भूरि स्फुटं दीप्ततरं विचिन्त्यम् ।
ऊर्ध्वे स्थिता चन्द्रकला च शान्ता पूर्णामृतानन्दरसेन देवि ।।
तदोभयोर्वह्निविषानुयोगात्तेजःशशाङ्कौ द्रवितौ च यस्मात् ।
तेजश्शशाङ्कःस्फुटमिश्रितत्वाद्भवेत्तदार्कं त्ववतारूपम् ।।

परस्परसमाविष्टौ चन्द्रेऽग्नीष्टीटिभे शशी ।
चन्द्रं सृष्टिं विजानीयादग्निः संहार उच्यते ।।
अवतारो रविः प्रोक्तो मध्यस्थः परमेश्वरः ।।

ततः सकाशात्प्रभवाप्ययौ स्तो यस्मादयं विश्वसमग्रभेदः ।
एतच्च विद्वान्विदितार्थभावो ध्यायेत युक्त्यात्मचिदर्करूपम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

द्वारेशा नवरन्ध्रगा हृदयगो वास्तुर्गणेशो महान्
शब्दाद्या गुरवः समीरदशकं त्वाधारशक्त्यात्मकम् ।
चिद्देवोऽथ विमर्शशक्तिसहितः षाड्गुण्यमङ्गावलि-
र्लोकेशाः करणानि यस्य महिमा तं नेत्रनाथं स्तुमः ।।

विगलति भवदौर्गत्यं मोक्षश्री श्रयति हृत्कजं कचति ।
प्रसरति परमानन्दो यत्र तदीशार्चनं जयति ।। ३ ।।

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।।

क्लेशान्विनाशाय विकासय हृत्सरोज-
मोजो विजृम्भय निजं नरिनर्तयाङ्गम् ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

चेतश्चकोरचितिचन्द्रमरीचिचक्रम्
आचम्य सम्यगमृतीकुरु विश्वमेतत् ।।

भवन्मयस्वात्मनिवासलब्ध सम्पद्भराभ्यर्चितयुष्मदङ्घ्रिः ।
न भोजनाच्छादनमप्यजस्रमपेक्षते यस्तमहं नमामि ।।

आधीनामगदं दिव्यं व्याधीनां मूलकृन्तनम् ।
उपद्रवानां दलनं महादेवमुपास्महे ।। ३ ।।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतमरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

त्वय्येव भातः स्मृतिविस्मृति ते
द्वयोरपि त्वं स्वयमेव भासि ।
तथापि सांमुख्यसुखाभिवर्षिणी
स्मृतिः प्रिया ते नहि विस्मृतिर्मे ।।

महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न कापि भेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ।।

भानुना तुहिनभानुना बृहद्भानुना च विनिवर्तितं न यत् ।
येन तज्झगिति शान्तिमान्तरं ध्वान्तमेति तदुपास्महे महः ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

संग्रहेन सुखदुःखलक्षण
मां प्रति स्थितमिदं श्रृणु प्रभो ! ।
सौख्यमेष भवता समागमः
स्वामिना विरह एव दुःखिता ।।

दासधाम्नि विनियोजितोऽप्यहं
स्वेच्छयैव परमेश्वर ! त्वया ।
दर्शनेन न किमस्मि पात्रितः
पादसंवहनकर्मणापि वा ।।

शक्तिपातसमये विचारणं
प्राप्तमीश न करोषि कर्हिचित् ।
अद्य मां प्रति किमागतं यतः
स्वप्रकाशनविधौ विलम्बसे ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अस्तङ्गतवति प्राणे त्वपानेऽभ्युदयोन्मुखे ।
तावत्सा कुम्भकावस्था योगिभिरनुभूयते ।।

यथा निमीलने काले प्रपञ्चो नैव दृश्यते ।
तथैवोन्मीलनं स्याच्चेदेतद्ध्यानस्य लक्षणम् ।।

प्रकाशमाने परमार्थभानौ
नश्यत्यविद्यातिमिरे समस्ते ।
तदा बुधा निर्मलदृष्टयोऽपि
किञ्चिन्न पश्यन्ति भवप्रपञ्चम्।।

प्रनष्टवायुसंचारः पाषाण इव निश्चलः ।
परजीवैक्यधर्मज्ञो योगी योगविदुच्यते ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

लिङ्गेऽत्र भक्तदयया क्षणमात्रमेकं
स्थानं व्यधाय भव मद्विहितं पुरारे! ।
सर्वेश ! विश्वमय ! हृत्कमलाधिरूढः
पूजां गृहाण भगवन् ! भव मेऽद्य तुष्टः ।।
भूमेर्जलात्तु पवनादनलाद् हिमांशोः -
उष्णांशुतो हृदयतो गगनात्समेत्य ।
लिङ्गेऽत्र सन्मणिमये मदनुग्रहार्थं
भक्त्यैकलभ्य ! भगवन् ! कुरु सन्निधानम् ।।
त्वं सर्वगोऽसि भगवन् ! किल यद्यपि त्वाम्
आवाहयामि यथा व्यजनेन वायुम् ।
गूढो यथैव दहनो मथनाद् उपैति
आवाहितोऽस्मि तथा दिशतु मां तवार्चाम् ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

मालाधराच्युत-विभोः-परमार्थमूर्ते !
सर्वज्ञ ! सर्वकरणादिशुभस्वभावे ।
लिङ्गेऽत्र सन् मणिमये मदनुग्रहार्थं
भक्त्यैकलभ्य ! भगवन् ! भव सन्निधानम् ।।

भगवन् ! पार्वतीनाथ ! भक्तानुग्रहकारक !
अस्मद्दयानुरोधेन सन्निधानं कुरु प्रभो ! ।। ३ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सोऽहं सोऽहं

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं

I am not this body this body is not mine !

I am not this body this body is not mine !

सोऽहं सोऽहं

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं

I am not this mind this mind is not mine !

I am not this mind this mind is not mine !

सोऽहं सोऽहं

सोऽहं शिवोऽहं

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं ।

I am not this ego this ego is not mine !

I am not this ego this ego is not mine !

सोऽहं सोऽहं

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं

सोऽहं शिवोऽहं

ॐ नमःशिवाय

ॐ नमःशिवाय

ॐ नमःशिवाय

ॐ नमःशिवाय

सोऽहं सोऽहं

सोऽहं शिवोऽहं

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सोऽहं शिवोऽहं
सोऽहं शिवोऽहं
सोऽहं सोऽहं
सोऽहं शिवोऽहं
सोऽहं शिवोऽहं
सोऽहं शिवोऽहं
सोऽहं सोऽहं
सोऽहं शिवोऽहं
सोऽहं शिवोऽहं
सोऽहं शिवोऽहं
सोऽहं सोऽहं
सोऽहं शिवोऽहं
सोऽहं शिवोऽहं
सोऽहं शिवोऽहं

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(१) (३)

ॐ अमृतेश्वरभैरवं स्वच्छन्दनाथं

(१) (१) (३)

श्रीकण्ठनाथं ऋषि दुर्वाससम् ।

मानस-पुत्रं त्र्यम्बकनाथं

(३)

आमर्दकनाथं श्रीनाथम् ।।

मानसपुत्रीं अर्धत्र्यम्बकाख्यां

त्र्यम्बकादित्यम् ।

(३) (३)

सङ्गमादित्यं वर्षादित्यमरुणादित्यम् ।।

(३) (३)

आनन्दं सोमानन्दं उत्पलदेवं

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

(३)

आचार्यवरं श्रीशम्भुनाथम् ।
लक्ष्मण-गुप्तमभिनवगुप्तं
क्षेमराजं योगराजं च ।।
श्रीगुरू-मनकाकं
शैवाचार्यं रामं
तत् शिष्यं श्रीमहताबकाकम् ।
गुरुसन्तति-रूपे अवतारितं
(३) (३)
शैव-शम्भुं ईश्वरस्वरूपं च ।।
(३) (१) (२)
भैरवं रुद्रं शिवतन्त्रं
(३) (३)
आलयं करुणालयम् ।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

नमामि भगवत् पादं

(२) (३)

शंकरं लोकशंकरम् ।।

(२) (३)

शंकरं शङ्कराचार्यं

महान्तमभिनवगुप्तम् ।

(३)

शैव-शङ्कर-अवतारितं

(३) (३)

ईश्वरस्वरूपं पुनः पुनः नमामि ।।

....

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

४

सद्गुरू महाराज की जय जय जय
सद्गुरू महाराज की जय जय जय
सद्गुरू महाराज की जय जय जय

श्री अमृतेश्वरभैरव नाथ की जय जय जय
श्री अमृतेश्वरभैरव नाथ की जय जय जय
श्री अमृतेश्वरभैरव नाथ की जय जय जय

परभैरव नाथ की जय जय जय
परभैरव नाथ की जय जय जय
परभैरव नाथ की जय जय जय

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

कल्कीजी महाराज की जय जय जय
कल्कीजी महाराज की जय जय जय
कल्कीजी महाराज की जय जय जय

जय गुरूदेव ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सद्गुरुलक्ष्मणदेवस्य
अष्टोत्तर शत नामावली

***

ॐ गुरवे नमः

ॐ ईश्वरस्वरूपाय विद्महे ईश्वराश्रमाय धीमहि ।
तन्नोऽमृतेश्वरः प्रचोदयात् ॥ ३ ॥

अथ ध्यानम्

सहस्रदलपंकजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणम्
स्मरेत् शिरसि संततं ईश्वरस्वरूपं लक्ष्मणम् ॥

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।
गुरवे शिवाय परभैरवाय ।
ईश्वरस्वरूपाय श्रीलक्ष्मणाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१।।
नारायणाय काक आत्मजाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।२।।
'अरिणी' सुताय 'कतिजी' प्रियाय ।
गुरवे शिवाय परभैरवाय ।।३।।
महताबकाकस्य शिष्योत्तमाय।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।४।।
श्रीरामदेवस्य च वल्लभाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।५।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

महादेवशैले कृतसंश्रयाय ।

गुरवे शिवाय परभैरवाय ।।६।।

मासि वैशाखे बहुले भवाय।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।७।।

एकाधिकेशतिथि सम्भवाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।८।।

शिष्यप्रियाय भयहारकाय ।

गुरवे शिवाय परभैरवाय ।।९।।

'लालसअब' नाम्ना उपकारकाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१०।।

प्रद्युम्नपीठस्य महेश्वराय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।११।।

सर्वान्तरस्थाय भूतेश्वराय ।

गुरवे शिवाय परभैरवाय ।।१२।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अमराभिवन्द्याय अमरेश्वराय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१३।।

ज्वालेष्टदेव्या हि दत्ताभयाय।
तुभ्यं नमः श्रीगुरवे शिवाय ।।१४।।

देवाधिदेवाय भवान्तकाय।
गुरवे शिवाय परभैरवाय ।।१५।।

संवित्स्वरूपाय विलक्षणाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१६।।

हृत्पद्मसूर्याय विश्रान्तिदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।१७।।

समस्तशैवागम पारगाय ।
गुरवे शिवाय परभैरवाय ।।१८।।

प्रसन्नधामामृत मोक्षदाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१९।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

रम्याय हृद्याय परन्तपाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।२०।।

स्तोत्राय स्तुत्याय स्तुतिकराय ।
गुरवे शिवाय परभैरवाय ।।२१।।

आद्यन्तहीनाय नरोत्तमाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।२२।।

शुद्धाय शान्ताय सुलक्षणाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।२३।।

आनन्दरूपाय अनुत्तराय ।
गुरवे शिवाय परभैरवाय ।।२४।।

अजाय ईशाय सर्वेश्वराय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।२५।।

भीमाय रुद्राय मनोहराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।२६।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

हंसाय शर्वाय दयामयाय ।

गुरवे शिवाय परभैरवाय ।।२७।।

द्वैतेन्धनदाहक पावकाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।२८।।

मान्याय गण्याय सुभूषणाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।२९।।

शक्तिशरीराय परभैरवाय ।

गुरवे शिवाय परभैरवाय ।।३०।।

दानप्रवीराय गतमदाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।३१।।

मतेरगम्याय परात्पराय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।३२।।

धर्मध्वजायाति शुभङ्कराय ।

गुरवे शिवाय परभैरवाय ।।३३।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

स्वामिन् गौतम गोत्रोद्भवाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।३४।।

मन्दस्मितेनाति सुखप्रदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।३५।।

यज्ञाय यज्याय च याजकाय ।
गुरवे शिवाय परभैरवाय ।।३६।।

देवाय वन्द्याय भवप्रियाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।३७।।

सर्वत्र पूज्याय विद्याधराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।३८।।

धीराय सौम्याय तन्त्रात्मकाय ।
गरवे शिवाय परभैरवाय ।।३९।।

मन्त्रात्मरूपाय दीक्षाप्रदाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।४०।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

संगीतसाराय गीतिप्रियाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।४१।

प्रत्यक्षदेवाय प्रभाकराय ।

गुरवे शिवाय परभैरवाय ।।४२।।

अनघाय अज्ञान विध्वंसकाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।४३।

सिद्धिप्रदाय बन्धुरर्चिताय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।४४।

अक्षरात्मरूपाय प्रियव्रताय ।

गुरवे शिवाय परभैरवाय ।।४५।।

लावण्यकोषाय मदनान्तकाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।४६।

अमितायानन्ताय भक्तप्रियाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।४७।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सोऽहंस्वरूपाय हंसात्मकाय ।
गुरवे शिवाय परभैरवाय ।।४८।।
उपाधिहीनाय निराकुलाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।४९।।
राजीवनेत्राय धनप्रदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।५०।।
गोविन्दरूपाय गोपीधवाय ।
गुरवे शिवाय परभैरवाय ।।५१।।
नादस्वरूपाय मुरलीधराय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।५२।।
बिसतन्तुसूक्ष्माय महीधराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।५३।।
राकेन्दुतुल्याय सौम्याननाय ।
गुरवे शिवाय परभैरवाय ।।५४।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सर्वज्ञरूपाय च निष्क्रियाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।५५।।

चितिस्वरूपाय तमोपहाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।५६।।

आबालवृद्धान्त प्रियंकराय ।
गुरवे शिवाय परभैरवाय ।।५७।।

जन्मोत्सवे सर्वधनप्रदाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।५८।।

षडर्धशास्त्रस्य च सारदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।५९।।

अध्वा अतीताय सर्वान्तगाय ।
गुरवे शिवाय परभैरवाय ।।६०।।

शेषस्वरूपाय सदातनाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।६१।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

प्रकाशपुञ्जाय सुशीतलाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।६२।।
निरामयाय द्विजवल्लभाय ।
गुरवे शिवाय परभैरवाय ।।६३।।
कालाग्निरुद्राय महाशनाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।६४।।
अभ्यासलीनाय सदोदिताय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।६५।।
त्रिवर्गदात्रे त्रिगुणात्मकाय ।
गुरवे शिवाय परभैरवाय ।।६६।।
प्रज्ञानरूपाय अनुत्तमाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।६७।।
ईशानदेवाय मयस्कराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।६८।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

कान्ताय त्रिस्थाय मनोमयाय ।

गुरवे शिवाय परभैरवाय ।।६९।।

हृत्पद्मतुल्याय मृगेक्षणाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।७०।।

सर्वार्थदात्रेऽपि दिगम्बराय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।७१।।

तेजःस्वरूपाय गुरवे शिवाय ।

गुरवे शिवाय परभैरवाय ।।७२।।

कृतागसां दाक् अघदाहकाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।७३।।

बालार्कतुल्याय समुज्वलाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।७४।।

सिन्दूर लाक्षारुण आननाय ।

गुरवे शिवाय परभैरवाय ।।७५।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

सर्वात्मदेवाय अनाकुलाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।७६।।

मातृ प्रमेय प्रमाणमयाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।७७।।

रसाधिपत्याय रहःस्थिताय ।

गुरवे शिवाय परभैरवाय ।।७८।।

उपमाविहीनाय उपमाधराय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।७९।।

स्वातन्त्र्यरूपाय स्पन्दात्मकाय ।

तुभ्यं नमः श्रीगुरवे शिवाय ।।८०।।

अभिनवगुप्ताय काश्मीरिकाय ।

गुरवे शिवाय परभैरवाय ।।८१।।

संकोचशून्याय विभूतिदाय ।

तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।८२।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

स्वानन्दलीलोत्सव संरताय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।८३।

मालिनीस्वरूपाय मातृकात्मकाय ।
गुरवे शिवाय परभैरवाय ।।८४।।

धर्मपददर्शन दीपकाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।८५।

सायुज्यदात्रे परभैरवाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।८६।

पादाब्जदीप्याऽपहतमलाय ।
गुरवे शिवाय परभैरवाय ।।८७।।

समस्तदैन्यादि विनाशकाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।८८।

महेश्वराय जगदीश्वराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।८९।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

खस्थाय स्वस्थाय निरंजनाय ।
गुरवे शिवाय परभैरवाय ।।९०।।
विज्ञानज्ञानाम्बुभिः शान्तिदाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।९१।।
गुरवे मदीयाय मोक्षप्रदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।९२।।
शिवावताराय च दैशिकाय ।
गुरवे शिवाय परभैरवाय ।।९३।।
अनादिबोधाय संवित्घनाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।९४।।
आचार्य शङ्कर गिरेः शिवाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।९५।।
परभैरवधाम्नि कृतसंश्रयाय ।
गुरवे शिवाय परभैरवाय ।।९६।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

भैरवरूपाय श्रीसक्ष्मणाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।९७।

खेदिग्गोभूवर्ग चक्रेश्वराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।९८।

स्वच्छन्दनाथाय मम पालकाय ।
गुरवे शिवाय परभैरवाय ।।९९।।

अमृतद्रवाय अमृतेश्वराय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१००

यज्ञस्वरूपाय फलप्रदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।१०१।

नानदत्त आत्रेय पुत्रीसुताय ।
गुरवे शिवाय परभैरवाय ।।१०२।।

सत्याय नीलोत्पल लोचनाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१०३

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

भवाब्धिपोताय सुरेश्वराय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।१०४।।

शिवस्वभावं ददते नराय ।
गुरवे शिवाय परभैरवाय ।।१०५।।

विद्याशरीराय विद्यार्णवाय ।
तुभ्यं नमः श्रीगुरुलक्ष्मणाय ।।१०६।।

मूर्धन्यदेवाय सकलप्रदाय ।
तुभ्यं नमः श्रीगुरवे शिवाय ।।१०७।।

योगीन्द्रनाथाय सदाशिवाय ।
गुरवे शिवाय परभैरवाय ।।१०८।।

यः पठेत् प्रयतो भक्तः जपेत् वा गुरुसन्निधौ ।
गुरोः नामावली नित्यं गुरुस्तस्मै प्रसीदति।।
गुरोर्महात्म्य मालेयं सर्वताप निवारिका ।
गुम्फिता गुरुदासेन पिकेन ह्यनुरोधत्तः ।। जय गुरुदेव ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

व्याप्तचराचरभावविशेषं
चिन्मयमेकमनन्तमनादिम् ।
भैरवनाथमनाथशरण्यं
तन्मयचित्ततया हृदि वंदे ।। १ ।।
त्वन्मयमेतदशेषमिदानीं
भाति मम त्वदनुग्रहशक्त्या ।
त्वं च महेश ! सदैव ममात्मा
स्वात्ममयं मम तेन समस्तम् ।। २ ।।
स्वात्मनि विश्वगते त्वयि नाथे
तेन न संसृतिभीतिः कथाऽस्ति ।
सत्स्वपि दुर्धरदुःखविमोह-
त्रासविधायिषु कर्मगणेषु ।। ३ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

अन्तक ! मां प्रति मा दृशमेनां
क्रोधकरालतमां विदधीहि ।
शङ्करसेवनचिन्तनधीरो
भीषणभैरवशक्तिमयोऽस्मि ।। ४ ।।
इत्थमुपोडभवन्मयसंविद्-
दीधितिदारितभूरितमिस्त्रः ।
मृत्युयमान्तककर्मपिशाचै-
र्नाथ! नमोऽस्तु न जातु विभेमि ।। ५ ।।
प्रोदितसत्यविबोधमरीचि-
प्रोक्षितविश्वपदार्थसतत्त्वः ।
भावपरामृतनिर्भरपूर्णे
त्वय्यऽहमात्मनि निर्वृतिमेमि ।। ६ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

मानसगोचरमेति यदैव
क्लेशदशाऽतनुतापविधात्री ।
नाथ ! तदैव मम त्वदभेद-
स्तोत्रपराऽमृतवृष्टिरुदेति ।। ७ ।।
शङ्कर ! सत्यमिदं व्रतदान-
स्नानतपो भवतापविनाशि ।
तावकशास्त्रपराऽमृतचिन्ता
सिध्यति चेतसि निर्वृतिधाराः ।। ८ ।।
नृत्यति गायति हृष्यति गाढं
संविदियं मम भैरवनाथ !
त्वां प्रियमाप्य सुदर्शनमेकं
दुर्लभमन्यजनैः समयज्ञम् ।। ९ ।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

वसुरसपौषे कृष्णदशम्या-
मभिनवगुप्तः स्तवमिदमकरोत् ।
येन विभुर्भवमरुसन्तापं
शमयति झटिति जनस्य दयालुः ।। १० ।।
इति श्री अभिनवगुप्ताचार्यकृता शिवचामरस्तुतिः ॥
हरिरेव जगज्जगदेव हरिः
हरितो जगतो नहि भिन्नमणुः ।
इति यस्यमतिः परमार्थगतिः
स नरो भवसागरमुत्तरति ।।
आदावन्ते चिद्रस रूपं
मध्येचिद्रस बुद्बुद्रूपम् ।
भातं भातं भारूपं स्यात्
नो भातं चेन्नितरां न स्यात् ।।

इति शिवम् ॥

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

जय गुरुदेव हरे जय जय गुरुदेव हरे ।
मम सद्गुरु श्रीलक्ष्मण क्षण में कष्ट हरे ।।जय०।।१।।
सबलक्षण सुन्दर तू सर्वसंकट हारी ।
अन्तस्तमहर्ता तू भव अर्णव तारी ।।जय०।।२।।
सौम्यमूर्ति तू साजे अवहितजन ध्यावे ।
भुक्ति-मुक्ति के दाता गांगत कर जोरे ।।जय०।।३।।
जिस दिन तुझको पाया निखर उठी काया ।
भव-बन्धन सब बिखरे हरली मम माया।। जय०।।४।।
हे मम सद्गुरु! हर लो दुष्कृत जन्मों के ।
मेरे पालनकर्ता द्वार पडा तेरे ।। जय० ।।५।।
मल मेरे सब काटो हृदयकमल विकसे ।
अन्तस्त्रय मेरा नित तुझ में लीन रहे ।।जय०।।६।।

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

श्रीगुरुपद से जन्मे धूल से भाल सजे ।
विधि के कलुषित अक्षर विनशे हिम जैसे।।जय०।।७।।
तनमन सौंपूं तुझको हे सद्गुरु प्यारे ।
नाम स्मरण जप में नित, रहूं मगन तेरे।। जय० ।।८।।
मैं बुद्धिहीन हूं चंचल तन मेरा निर्बल ।
एकबार अपनाओ जन्म सफल होवे ।।जय०।।९।।
श्रीलक्ष्मण गुरुदेव की आरती जो गावे ।
बह शिवभक्त निःसंशय शिवसम हो जावे।।जय०।।१०।।
जय गुरुदेव हरे जय जय गुरुदेव हरे ।
मम सद्गुरु श्रीलक्ष्मण क्षण में कष्ट हरे ।।जय०।।११।।

******

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri

Printed at :
SHIV ART PRINTERS
Mohalla Ustad, Jammu
Ph. : 547559, 574371

CC-0. Omkar Nath Shastri Collection Jammu. Digitized by eGangotri